अजिनाषाढयोः धरः (धरति इति धरः). अजिनं कृष्णाजिनं Skin of a deer. आषाढ a पलाश staff. "आषाढो व्रतिनां दण्डे मासे मलयपर्वते श्री पौर्णिमायाम्" मेदिनी. A Brahman ब्रह्मचारिन् is to have a पलश or बिल्व staff in his hand "ब्राह्मणो बैल्वपालाशौ क्षत्रियो वाटखादिरौ पैलवौदुम्बरौ वैश्यो दण्डानर्हन्ति धर्मतः" मनु II–45. ब्रह्मः वेदः तेन अध्ययनं लक्ष्यते । "अध्ययनमयेन वेदाध्ययनप्रकर्षजनितेन इत्यर्थः" नारायण—exceedingly refulgent owing to his Brahmanic lustre-produced by the study of ब्रह्म. The reading वर्चसा for तेजसा is also good.

जटिलः—जटावान् "मुण्डो वा जटिलो वा स्यादथवा स्याच्छिखाजटः" मनु० II—219.

बद्धं शरीरं येन सः शरीरबद्धः or बद्धशरीरः—the reading शरीरबन्धः—can be explained as शरीरं बध्नाति इति शरीरबन्धः ।

प्रथमाश्रम—the ब्रह्मचर्याश्रम. The first in order of the four stages of life. "ब्रह्मचारीगृहस्थश्च वानप्रस्थो यतिस्तथा । एते गृहस्थप्रभवाश्चत्वारः पृथगाश्रमाः ।" मनु० VI—87.

(i) ब्रह्मचर्य—The period of life to be spent at the Guru's house in pursuit of religious knowledge.

(ii) गार्हस्थ्य—second period where the "six duties" अध्ययन, अध्यापन, दान, प्रतिग्रह, यजन and याजन are to be observed in the capacity of a social being.

(iii) वानप्रस्थ—The life of retirement to forest with or without wife, where all the worldly attachment is to be removed and one is to be prepared for the fourth—संन्यास—renunciation.

(iv) संन्यास the final of the four stages where one has completely renounced all the worldly concerns and fixes his speculative gaze upon the मोक्ष.

Cf. अंसे कृष्णा जिनश्री स्त्रिगुणविरचिता मेखलाश्रोणिभागे पाणावाषाढदण्डो भसितविरचितं पुण्ड्रकं भालदेशे । दर्भैः क्लृप्तं पवित्रं श्रवसि परिणमन्मानतुङ्गी पिशङ्गी मौञ्जी पंङ्क्तिर्जटानां जपवलयमिदं स्फाटिकंच प्रकोष्ठे IV-6 पार्वतीपरिणय.

31. आतिथेयी पार्वती बहुमानपूर्वया सपर्यया तं प्रत्युदियाय साम्ये अपि निर्विष्टचेतसाम् वपुर्विशेषेषु अतिगौरवा क्रियाः भवन्ति ।

अतिथिषु साध्वी इति आतिथेयी—One who treats her guests hospitably.

सपर्या—worship; offering of अर्घ्य etc. ०निविष्टचेतसाम्—स्थिरचित्तानाम्-and hence not likely to be disturbed by feelings of jealousy etc.

साम्येऽपि (सति)—even when there is equality of footing. *V. l.* "साम्येऽभिनिविष्टचेतसाम्" means "of those who have set their hearts in equality" who are free from likes or dislikes.

"रागद्वेषराहित्यात् समबुद्धीनामित्यर्थः" But with this the propriety of वपुर्विशेषेषु is lost since such persons cannot be expected to observe distinctions. *Cf.* "आकृतिविशेषेषु आदरः पदं करोति" मालविका० I.

32. विधिप्रयुक्तां सत्क्रियां परिगृह्य क्षणं च परिश्रमं नाम विनीय उमां ऋजुना एव चक्षुषा पश्यन् अनुज्झितक्रमः सः वक्तुं प्रचक्रमे ।

नाम—is used here in the sense of अपरमार्थे. The ascetic was really शिव and was not fatigued at all, but he had to play his part and therefore feigned fatigue and rested for a while.

ऋजुनैवचक्षुषा—He would have liked to look at her with affectionate eyes but his disguise required that he should act towards her without any special attention—"विलासशून्येन इत्यर्थः" अनुज्झितः क्रमः येन—क्रमः propriety; decorum: नारायण explains क्रम as "कुशलप्रश्नमारभ्यतपश्चरणकारणप्रश्नपर्यन्तो वक्ष्यमाणो वचनविन्यासक्रमः अनुक्रमशब्देन विवक्षितः"

33. क्रियार्थं समित्कुशम् सुलभम् अपि, जलानि ते स्नानविधिक्षमाणि अपि, तपसि स्वशक्त्या प्रवर्तसे अपि, शरीरं खलु आद्यं धर्मसाधनम् ।

क्रियायै इदं क्रियार्थम्—To be used in performing religious rites.

समिधः कुशाश्च समित्कुशम्—by the rule "जातिरप्राणिना" पा० II. 4. 6. The sacrificial fuel and कुश grass. *Cf.* अपि क्रियार्थं

सुलभं पुष्पवारिसमित्कुशम् । अपि देवि तपोमूर्ध्नि स्वशक्त्यापि प्रवर्तसे । शिवपुराणम् । *Cf.* Raghu V. 5-8.

स्नानमेवविधिः स्नानविधिः तास्मिन् क्षमाणि योग्यानि. Is the water fit for you to bathe in ?

आद्यम्—The first and foremost (प्रथमम्) शीर्यत इति शरीरं (that which is shattered.) शरीरं.........Health is the most important consideration for religious observance. " A sound mind in a sound body. " They stand in the relation of thought to action; and as thought decides the action and its converse also so body is an unfailing inference to mind and the vice-versa.

अपि स्वशक्त्या°—Hast thou the strength enough to bear the strain of penance ?

34. त्वदावर्जितवारिसंभृतम् आसां वीरुधां प्रवालं अनुबन्धि अपि यत् चिरोज्झितालक्तकपाटलेन ते दन्तवाससा तुलामारोहति ।

वीरुधाम्—लतानाम् from रुह् with वि where the ह् is changed to ध्.

त्वया आवर्जितेन वारिणा संभृतम्—which are made to sprout by the water sprinkled by you.

दन्तानां वासः इव आच्छादकत्वात् that which covers the teeth. viz the lip.

तेन तुलां... ..some find the instr. case as faulty in this case according to पाणिनी II. 3 72. but मल्लीनाथ defends it by saying that the word तुला is in the sense of सादृश्य here, and hence the Instr. can be used. Bhoja not unlike मल्लि° defends it when he remarks "सदृशपदार्थवाची सादृश्यमात्रवाची चेति द्वौ तुलाशब्दौ । सादृश्यमात्रवाचकतुला शब्दयोगे तु तृतीयाऽपीष्यत इति ।" some supply सह after वाससा and solve the ensuing difficulty *cf.* नभसानिभृतेन्दुना तुलामुदितार्केण समारोहयत् Rag. VIII. चिरोज्झितः अलक्तकः येन तथाभूतेन सता अपि पाटलेन—which is yet red though long bereft of the red lac.

35. करदर्भप्रणयापहारिषु हरिणेषु ते मनः प्रसन्नं अपि ये उत्पलाक्षि-प्रचलैर्विलोचनैः तवाक्षिसादृश्यं प्रयुञ्जत इव ।

करस्थानां दर्भाणां प्रणयात् प्रार्थनात् हेतोः अपराधिषु अपराधवत्सु—*V. l.* who offend you by taking the कुश grass from your hand. "अयमेव मुनीनां प्रभावः यत् सापराधेऽपि जने दयावत्त्वमिति" नारायण. °अपहारिषु for °अपराधिषु means "who take away" *cf.* क्रियानिमित्तेष्वपि......Raghu V. 7.

उत्पलाक्षि—O you lotus-eyed one. *v. l.* उत्पलाक्षेपचलैः "tremulous and hence more beautiful than a lotus set aswing" and उत्पलक्षेपचलैः "unsteady like a lotus tossed about."

36. हे पार्वति, पापवृत्तये रूपं न इति यदुच्यते (तत्) अव्यभिचारि वचः तथाहि हे उदारदर्शने ते शीलं तपस्विनामपि उपदेशतां गतम् ।

व्यभिचरितुं यस्य शीलं व्यभिचारि. नव्यभिचारि—अव्यभिचारि—invariably true. **उदारं दर्शनं यस्याः सा**—Beautiful or one having fair eyes (दर्शन in the sense of eye.) "रन्ध्रोपनिपातिनोऽनर्थाः इति यदुच्यते तदव्यभिचारि वचः" शाकुन्तल VI.

पापवृत्तये रूपं न—The idea is very common with Sanskrit poets. *Cf.* "न तादृशा आकृति विशेषा गुणविरोधिनो भवन्ति" शाकुन्तल IV. "नह्याकृतिः सुसदृशं विजहाति वृत्तम्." मृच्छ० IX. "आकृतिमनुगृह्णन्ति गुणाः" विद्ध०; 'न तुलाविषये तवाकृतिर्न वचोवर्त्मनि ते सुशीलता त्वदुदाहरणाकृतौ गुणा इति सामुद्रिकसारमुद्रणा नैषध II." also "प्रायः कुरूपेषु भवन्ति दोषाः । यत्राकृतिस्तत्रगुणाः वसन्ति" बृहत्संहिता०.

37. एषः महीधरः सान्वयः विकीर्णसप्तर्षिबलिप्रहासिभिः दिवः च्युतैः गाङ्गैः सलिलैः तथा न पावितः यथा त्वदीयैः अनाविलैः चरितैः (पावितः).

विकीर्ण० &c. The Seven Ṛshis are described as bathing in the heavenly Ganges: for सप्तर्षि see notes on 1. 16. They are described in VI. 5—11 आप्लुतास्तिरमन्दारकुसुमोत्किरवीचिषु । व्योमगंगाप्रवाहेषु दिङ्नागमदगन्धिषु. बलि-'बलिशब्देनात्र तदुपयुक्तानि कुसुमदीनि लक्ष्यन्ते' Narayan—*i. e.* the flower therein: these are poetically represented as the smiles of मन्दाकिनी, on account of their white colour. V. L. प्रभासिभिः means 'resplendent' प्रभासितुं शीलमेषां इति ते: अनाविलैः pure, not turbid (आविल)—the

word indicates superior sanctity of Parvati's course of life. The waters of the Ganges may become turbid but Parvati's acts were always virtuous (अनाविल). [Tr—This mountain with all his family, has not been so sanctified by the waters of the Ganges, dropping down from heaven and appearing bright with the offerings (of flowers &c.) by the seven sages, as by your stainless acts].

38. (हे) भाविनि यत् मनोनिर्विषयार्थकामया त्वया एकः एव (धर्मः) प्रतिगृह्य सव्यते अनेन धर्मः सविशेषं त्रिवर्गसारः अद्य मे प्रतिभाति। त्रयाणां (धमार्थकामानां) वर्गः त्रिवर्गः तत्र सारः (the best part, essence). मनसः निर्विषयौ अर्थकामौ यस्याः त्वया—Since Parvati selected only धर्म of the three objects of human existence, it came to have a special estimation of its own. ' अप्यर्थकामौ तस्यास्तां धर्म एव मनीषिणः' रघु० 1-25. The reading भामिनि is explained by Aruna as देवसंपन्ने ' भाम दैवानुकूल्यं च सौभाग्यं चापि कथ्यते । ' इति पुराणकविः, Dakshinavarta explains भामिनि as ' कोपने '—its usual meaning and takes the expression to be one of taunt (तपसा, यं कंचित् काम-यमानेव लक्ष्यसे। ततः कामाद् धर्मफलप्रशंसया मास्म कुप्येत्युपालम्भगर्भं संबोधनम्।) Aruna finds fault with this explanation as it would necessitate the expression मनोनिर्विषयार्थकामया being taken as containing a taunt too.

39. आत्मना प्रयुक्तसत्कारविशेषं मां परं संप्रतिपत्तुं न अर्हसि, यतः हे संनतगात्रि मनीषिभिः सतां संगतं साप्तपदीनं उच्यते।

प्रयुक्तः सत्कारविशेषः यस्मिन् तं Aruna reads सा प्रतिपत्तुं—सा—you who were so kind to me: संनतं stooping, hence beautiful. ' नतं चारु संनतमिति' भोजः. संगतं friendship. सप्तभिः पदैः अवाप्यते इति साप्तपदीनं – पद stop or word–formed when seven words are exchanged or when seven steps are gone over in company. ' प्राहुः साप्तपदीं मैत्रीं जनाः शास्त्रविचक्षणाः । सतां सप्तपदा मैत्री सत्सतां त्रिपदास्मता। सत्सतामपि येसन्तस्तेषां मैत्री पदे पदे । ' *Cf.* ' संबन्धमाभाषणपूर्वमाहुर्वृत्तः स न संगतयोर्वनान्ते। तद्भूतनाथानुग नार्हसि त्वं संबंधिनो मे प्रणयं विहन्तुम् " रघु. II. 58.

40. हे तपोधने अतः अत्र बहुक्षमां भवतीं द्विजातिभावादुपपन्नचापलः अयं जनः किंचित् प्रष्टुमनाः रहस्यं न चेत् प्रतिवक्तुं अर्हसि ।

अतः because Parvati and the ascetic have become friends. बह्वी क्षमा यस्याः तां—of a forbearing temperament. Malli. explains it also as बहूक्तिसहां—and hence it is that he makes bold to ask the question. द्विजाति &c. चापलं—धाष्टर्य—want of patience; also curiosity and loquacity.—द्विजाति refers here to the Brahmana class alone though the word is applicable in the case of the first three classes. 'मातुर्यदग्रे जायन्ते द्वितीयं मौञ्जिबन्धनात् । ब्राह्मणक्षत्रियविशस्तस्मादेते द्विजाः स्मृताः' 'सिद्धं ह्येतद्वाचि वीर्यं द्विजानाम्'—उत्तर० V. प्रष्टुमनाः—प्रष्टुं मनः यस्य सः—'तुं काममनसोरपि' इति मकारालोपः. न चेत् &c. he does not want to wrest the secret from her, if she does not wish to divulge it. 'नात्र मे निर्बन्धः' इति भावः. The reading प्रतिबोधयिष्यसि means 'ज्ञापयिष्यसि' you will please let me know. The reading परिगोपयिष्यसि does not yield a good sense.

41. प्रथमस्य वेधसः कुले प्रसूतिः वपुः त्रिलोकसौन्दर्यं इव उदितं, ऐश्वर्यसुखं अमृग्यं, वयः नवम्, अतः परं किं तपः फलं स्यात् वद ।.

People generally resort to practising penance for acquiring a birth in high or noble families (*e. g.* Vishwamitra wished to be a Brahman विश्वामित्रादिवदाभिजात्यकामनया) or for acquiring beautiful form or for obtaining affluence. But Parvati had already all these. Hence it is that the ascetic wants to know what actuated Parvati to undertake such rigorous penance. प्रथमस्य वेधसः—The Mountain हिमालय was created by Brahmâ himself, the primeval creator 'यज्ञार्थं हि मयासृष्टो हिमवानचलेश्वरः.'

उदितं—एकत्रसमाहृतं brought together *V. l.* आर्जितं—एकत्र सञ्चितं—collected. ऐश्वर्य—For her father's city was the abode of wealth of every kind 'अलकामतिवाह्येव वसतिं वसुसम्पदाम्.। स्वर्गाभिष्यन्दवमनं कृत्वेवोपनिवेशितम्' ॥—कुमार० VI. 37. also 'जन्मान्ववाये प्रथमस्य धातुः पिता गरीयान् गिरिसार्वभौमः । वपुर्मनोहारि वचश्वरम्यं पदं च लोकादतिलोकमस्याः ॥—पा. प. IV. 11.

42. दुःसहात् अनिष्टात् अपि मनस्विनीनां इदृशी प्रतिपत्तिः भवति नाम । हे कृशोदरि तत् (अनिष्टं) च विचारमार्गप्रहितेन चेतसा त्वयि न दृश्यते ।.

प्रतिपत्तिः—प्रवृत्तिः tendency; course of conduct. अनिष्टं—'calamity." Mall. explains it as भर्त्रादिकृतात्; the ascetic knows that she is a maiden 'अथोपयन्तारं &c.' and therefore this sense need not be taken. नाम is used सम्भावनायाम्, possibly. विचारस्य मार्गः तेन प्रहितेन. Aruna. reads तलोदरि for कृशोदरि—it has also the same meaning—निम्नोदरि करतलं हि किञ्चन निम्नं भवति ।.

43. इयमाकृतिः अलभ्यशोकाभिभवा, हे सुभ्रु पितुः गृहे विमानना कुतः, पराभिमर्शः तव न अस्ति, पन्नगरत्नसूचये कः करं प्रसारयेत् ।

अलभ्य &c. अलभ्यः शोकेन अभिभवः यस्याः सा. Dakshina-varta explains the compound as अलभ्यौ शोकाभिभवौ यस्याः सा and takes शोक as referring to पितृगेहे विमानना and अभिभव to पराभिमर्श. It is a common idea with Sanskrit poets that noble forms cannot be subjected to misery 'अहो दुर्निवारता व्यसनोपनिपातानां यदीदृशीमप्याकृतिमनभिभवनीयामात्मसात्कुर्वन्ति' Kâdam. 'तादृशा आकृति विशेषाश्चिरं दुःखभागिनो न भवन्ति' Vicr. IV. सुभ्रु- The Voc. sing. of सुभ्रू would usually be सुभ्रूः–and therefore Dakshinavarta suggests the reading सुभ्रूः कुतस्तातगृहे विमानना—The form, however, can be defended by treating सुभ्रूः like अलाबूः and कर्कन्धूः. पराभिमर्शः–insult from strangers, पन्नगरत्नसूचये-सूचि a sharp point or shooting lustre. *V. l.* °रत्नसूतये—सूतये=चालनाय for removing. Himalaya is compared to पन्नग and Parvati to the रत्न. Narayana remarks 'अत्र देव्या महाभाग्ययोगित्वं बन्धुजनमध्यवर्तित्वं पितृगौरवात्परानभिभवनीयत्वं चेति त्रयो हेतवोऽनिष्टप्राप्त्यभावे प्रतिपादिताः ।.

44. यौवने आभरणानि अपास्य त्वयावार्धकशोभिवल्कलं किमिति धृतम्; वद यदिप्रदोषे स्फुटचन्द्रतारका विभावरी अरुणाय कल्पते ।

वार्धके शोभितुं शीलमस्येति तथा. प्रदोष the beginning of the night. स्फुटचन्द्रतारका *v. l.* विनिकीर्णतारका that has scattered away the stars; this reading is better as it corresponds to अपास्य आभरणानि Parvati ought to be wearing ornaments and enjoying pleasures of youth but instead of this she had taken to the use of वल्कल and the life of an ascetic. प्रदोषे &c. Parvati coresponds to the

night, यौवन to प्रदोष, वल्कल to अरुण and the ornaments to the तारकाs. अरुणाय—अरुणं गन्तुं—Aruna is the elder brother of Garuda and the charioteer of the sun. No one would like to see the night with the moon and the stars shining brightly, suddenly come to an end and give place to the dawn.

45. यदि दिवं प्रार्थयसे श्रमः वृथा, तव पितुः प्रदेशाः देवभूमयः, अथ उपयन्तारं (प्रार्थयसे) समाधिना अलं; रत्नं न अन्विष्यति तत् हि मृग्यते।

श्रमः—also means 'penance'; 'अभ्यासे शस्त्रविद्यादौ वेदे तपसि च श्रमः' इति भोजः. समाधि penance *cf.* अस्त्येतदन्यसमाधिभीरुत्वं देवानाम् शाकुं० I. अन्विष्यति *V. l.* अन्विच्छति—both mean the same thing. Malli. नहि वरार्थं त्वया तपसि वर्तितव्यम् किंतु तेनैव त्वमर्थमिति भावः. अथ is also used प्रश्ने 'मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ' इति सिंहः

46. सोष्मणा निश्वासितेन निवेदितम्; (तथापि) मे मनः तु संशयमेव गाहते, ते प्रार्थयितव्यः एव न दृश्यते, प्रार्थितदुर्लभः कथं भविष्यति।
Parvati naturally heaved a sigh at the word· अथोपयन्तारं in the last verse, because the ascetic had hit upon her secret ते प्रार्थयितव्यम् *cf.* लभेत वा प्रार्थयिता नवा श्रियं श्रिया दुरापः कथमीप्सितो भवेत्' शाकुं III "Narayana explains" त्वद्रूपस्याधिकगुणो हि पुरुषस्त्वया प्रार्थयितव्यः। तादृशस्य लोकत्रयेऽप्यभावादियमुक्तिः

47. अहो तव ईप्सितः कः अपि युवा स्थिरः यः चिराय कर्णोत्पलशून्यतां गते कपोलदेशे कलमाग्रपिङ्गलाः श्लथलम्बिनीः जटाः उपेक्षते। कः अपि 'यः कश्चनापि साक्षाद्दाश्वरो वा'. The ascetic remarks, that the youth sought after by Parvati was a hardhearted one since he does not take pity on her. स्थिरः firm not easily affected or moved: hence 'stern', or relentless. The expression may have a covert reference to Shiva, स्थाणु. कर्णाले हारभूतमुत्पलं कर्णोत्पलं तेन शून्यस्यभावः ताम् श्लथाश्च ता लम्बिन्यश्च ताः *v. l.* °बन्धिनीः—the tie (बन्ध) of which was loosened.

48. मुनिव्रतैः अतिमात्रकर्शितां दिवाकराप्लुटविभूषणास्पदाम् दिवा शशाङ्कलेखामिव त्वां पश्यतः सचेतसः कस्य मनः न दूयते.

मुनिव्रतैः मुनीनां व्रतैः नियमैः (observances.) अतिक्रान्ता मात्रा यस्मिन् कर्मणि तत् अतिमात्रं—extremely emaciated by rigorous

practices. दिवाकरेण आदित्येन आप्लुष्टानि दग्धप्रायाणि विभूषणानां आस्पदानि यस्याः ताम् with places for ornaments scorched by the sun.

शशाङ्कलेखामिव *v. l.* °रेखामिव which is also a good reading *cf.* शशी दिवसधूसरो गलितयौवनाकामिनी......*Cf.* from भर्तृहरि's नीतिशतकम्."

49 तव प्रियं सौभाग्यमदेन वञ्चितं अवैमि यः चतुरावलोकिनः अरालपक्ष्मणः अस्य चक्षुषः आत्मीयं वक्त्रं लक्ष्यं चिरं न करोति।

सौभाग्यमदेन—सुभगत्वाभिमानेन (proud of his own beauty) "मदीयस्य सौभाग्यस्य लोकोत्तरत्वादियं सर्वथापि मामेवाभिसरिष्यतीत्यभिमानेनेत्यर्थः" नारायण.

अरालानि (crooked) पक्ष्माणि यस्य—with curved beautiful eyelashes. *Cf.* "रोमाञ्चलक्ष्येण सगात्रयष्टिं भित्वा निराक्रामदरालकेश्याः. रघु VI. 81. लक्ष्य—The object of sight. The Trivendrum edition reads "करोति लक्ष्यं रविमस्य चक्षुषः" which means "who makes the sun as the mark for her eyes." (when practising the पञ्चाग्निसाधन)

50. हे गौरि कियच्चिरं श्राम्यसि मम अपि पूर्वाश्रम संचित तपः विद्यते तदर्धभागेन काङ्क्षितं लभस्व तं वरं च साधु वेदितुमिच्छामि। पूर्वाश्रम०–पूर्वाश्रमे ब्रह्मचर्याश्रमे संचितं आर्जितम् acquired in the first stage of life (ब्रह्मचर्य.) some consider that this epithet is inappropriate, which is not so in fact. तपः शब्दमात्रेण तपः साधनभूतं शरीरं लक्ष्यते। साध्यसाधनभावश्च सम्बन्धः पूर्वाश्रमसंचितं पूर्वजगत्सर्गादौ अश्रमेण। मायामात्रेणेत्यर्थः। संपादितं यत्तपः शरीरं तस्याधंभागेन काङ्क्षितं लभस्व। मम शरीरार्धभागमेवते दास्यामि।" नारायण. The mention of पूर्वा० shows,—that he was almost sure of marrying पार्वती and entering the next stage of life the गृहस्याश्रम.

कियत्चिरं—How long *Cf.* "कियच्चिरेणार्यपुत्रः प्रतिपत्तिं दास्यति।" शाकु० VI. साधु-properly. *cf.* किमाकाङ्क्षसि सुश्रोणि कथयस्व ममाग्रतः। कुतूहलेन शुश्रुषुरहं तव नगेन्द्रजे" शिवपुराण।

51. इतिद्विजन्मना प्रविश्य अभिहितासा मनोरथं शंसितुं नशशाक अथो परिपार्श्ववर्तिनीं वयस्यां विवर्तितानअननेत्रम् ऐक्षत।

"अनुप्रविश्य"—अरुण.

4

प्रविश्य—Having divined her inmost thoughts "यस्य यस्य हि यो भावस्तेन तेनच तं नरं अनुप्रविश्यमेधावी क्षिप्रमात्मवशंनयेत् इतिन्यायेन कपटबटुना वशीकृतत्वमनेन दर्शितम् नारायण.

पार्वती could not speak owing to her coyness, so she made a sign to her friend to say something in reply.

परिपार्श्वे वर्तितुं शीलमस्याः—who always used to be by her side.

विवर्तिते परावर्तितेऽनञ्जने अञ्जनरहिते यथा भवतितथा eyes void of collyrium. "आदौ विरहपीडया पश्चात् तपश्चरेण अञ्जनरहिते" नारायण.

अयो—अथ—It is arcuaic expression.

52. तदीया सखी तं वर्णिनमुवाच हे साधो तवकुतूहलं चेत् निबोध यदर्थम् एतया अम्भोजम् उष्णवारणम् इव वपुः तपः साधनम् कृतम्.

वर्णिन्—वर्णः अस्य अस्ति इति । a ब्रह्मचारी a student of Vedas. "वर्णात् ब्रह्मचारिणि इति णिनिः" the Trivendrum edition reads "वाञ्छितं" *v. l.* for "वर्णिनम्"

The epithet साधु is significant here "नहि साधुषु किञ्चिदप्य-कथनीयमस्ति" नारायण.

उष्णवारणम्—आतपत्रम् an umbrella to ward off the sun-heat. She means to say that she is as if using a delicate lotus-petal to ward off the sun's heat, by herself—the delicate body of hers—practising the rigid penance.

यदर्थम्—For whose sake.

53. अधिश्रियः चतुर्दिगीशान् महेन्द्रप्रभृतीनवमत्य इयं मानिनी मदनस्य निग्रहात् अरूपहार्यं पिनाकपाणिं पतिं आप्तुं इच्छति ।

चतुर्णां दिशां ईशान् —Here इन्द्र, यम, वरुण and कुबेर are referred to as being the lords of the four main quarters—East, south, west and north respectively.

अधिगताश्रीः यैः or अधिका श्रीः येषां तान्—possessed of supreme powers.

मानिनी—a proud woman. *V. l.* भामिनि She most resolutely wishes for शिव as her husband who has destroyed मदन and consequentlly can't be led away by beauty–by force of penance.

54. पुरा असह्यहुङ्कारनिवर्तितः पुरारिं अप्राप्तमुखः विशीर्णमूर्तेरपि पुष्पधन्वनः शिलीमुखः इमां हृदि व्यायतपातं अक्षिणोत्।

असह्येन हुङ्कारेण निवर्तितः—हुङ्कार is the weapon of शिव as रुद्र.
अप्राप्तं मुखं (tip of the arrow) यस्य सः. शिली शल्यं मुखे यस्य सः शिलीमुखः—an arrow. "अलिबाणौ शिलीमुखौ" इत्यमरः।

व्यायतः पातः यथा भवति तथा.—So as to strike her cruelly and for a long time. The arrow though it failed to reach its target namely शिव found its mark in पार्वती who could not resist it and from that time she fell desperately in love with शिव.

पुरारिः—शिव also called त्रिपुरारिः।. The story is briefly thus: The three sons of तारक-ताराक्ष, कमलाक्ष, and विद्युन्माली obtained as a boon from ब्रह्मदेव permission to build three cities which could be destroyed only by a single blow. मय built three cities—a golden one in the heaven, a silver one in the अन्तरिक्ष—and one of iron on the earth. They oppressed the world and defeated the gods who thereupon sought the help of शिव. The gods gave शिव each one half of his strength and विश्वकर्मा constructed a special chariot and ब्रह्मदेव became the charioteer. The three cities, which always revolved stood stationary at the sight of शिव who with one arrow destroyed the cities and the असुरs as well.

55. तदाप्रभृति उन्मदना ललाटिकाचन्दनधूसरालका बाला पितुः गृहे तुषारसंघातशिलातलेष्वपि निर्वृतिं न जातु लभते स्म।

The present verse as also the next three describes the love-sick condition of पार्वती.

उन्मदना—नारायण remarks that मदन should be taken to mean "मदनवेदना". "अत्र मदनशब्दो मदनवेदनां लक्षयति."

ललाटिकाचन्दनं तेन धूसराणी अलकानि यस्याः सा ललाटिका—ललाटालङ्कारः ("कर्णललाटात्कनलंकारे इति कन्। प्रत्ययस्थादित्यादिना अकारस्येकारादेशः") the mark on the forehead. Sandal paste had been applied to the forehead in order so allay the love-heat. It

rendered the dishevelled hair whitish on account of its contact. दक्षिणावर्त remarks that the expression "ललाटिका" indicates maidenhood since in the case of married girls the expression is "तिलक" and not "ललाटिका." *Cf.* "विवाहदिक्षा तिलकं चकार" VII 24. According to अरुण॰ however this explanation is faulty. (ऊढाया अपि विरहतापप्रशमाय चन्दनेन ललाटिकैवालंकारः न तु तिलकः तस्य ललाटव्यापित्वाभावात् ।).

जातु—कदाचिदपि–at all–बाला—is quite significant here. She had no experience of such a condition before and therefore the agony of love was quite unbearable to her.

॰तलेषु—The plural is appropriate. When one snow-slab lost its cooling property owing to the heat of her body she tried another and so on, but she could find no case owing to her love malady being extremely unbearable." शश्वद्दयाप्तचन्दनाद्रिपवनस्पर्शं न संमन्यते शय्यां पल्लवकल्पितां न सहते चन्द्रातपं निन्दति । नो वा पद्मपलाशनिर्मिततनुप्रावारमाक्षम्यते सा नीहारशिलातले शृणु परं तापातुरा वर्तते ।। पार्व॰ परि॰ IV.—4.

56. पिनाकिनः चरिते उपात्तवर्णे (सति) इयं अनेकशः वनान्त संगीतसखीः किन्नरराजकन्याः सबाष्पकण्ठस्खलितैः पदैररोदयत् ।.

उपात्तः वर्णः यस्मिन्—वर्ण is used in the sense of गीतिक्रम शुक्लादौ ब्राह्मणादौ च शोभायामक्षरे व्रते गीतिक्रमे स्तुतौ वेषे वर्ण शब्दः स्मृतो बुधैः" हलायुधः,)

बाष्पेण सहिते कण्ठे स्खलितैः—*cf.* "कण्ठस्तम्भित बाष्पवृत्ति कलुषः" शाकु॰ IV. When her friends sang the heroic deeds of शिव she often wept and faltered in her words her throat being choked with tears. The किन्नर maidens too sympathised with पार्वती in her distress and they too wept. पार्वती wept because of her being not fortunate enough to secure शिव for her husband. अन्त—the forest spot *Cf.* "यत्र रम्यो वनान्तः" उत्तर॰ II. 25.

57. त्रिभागशेषासु निशासु च क्षणं नेत्रे निमील्य सहसा हे नीलकण्ठ क व्रजसि इति अलक्ष्यवाक् असत्यकण्ठार्पितबाहुबन्धना इयं व्यबुध्यत ।.

त्रितीयः भागः त्रिभागः शेषः यासु The night is called त्रियामा. पार्वती could not get sleep, till very late at night and even

when she closed her eyes she would be disturbed by a dream {that शिव was by her side and that he was going to leave her. She would wake up at once and cry aloud "O शिव ! where are you running away" and would try to embrace some body who was not there wishing to keep him tightly held up by her बाहुबन्धन. *Cf.* "निद्रांगत्वा किमपिरुदती सस्वनं विप्रबुद्धा" मेघ ॥ 57.

अलक्ष्यवाक्—अविद्यमानं लक्ष्यं यस्याः सा अलक्ष्या (without its object namely the person addressed) वाक् यस्याः सा.

असत्ये कण्ठे अर्पितं बाहुबन्धनं यया सा.—

58. त्वं बुधैः सदा सर्वगतः उच्यसे भावस्थं इमं जनं कथं न वेत्सि इति मुग्धया स्वहस्तोल्लिखितः चन्द्रशेखरः रहसि उपालभ्यत च ।

सदा *v. l.* यदा is not so good as सदा meaning "always present everywhere."

सर्वगतः—Who is not a subject to the power of "time and space" "अनेन देशकालपरिच्छिन्नत्वं निरस्तम्–" नारायण.

भावे तिष्ठति इति भावस्थः—love-smitten स्वहस्तेन उल्लिखितः चन्द्रः शेखरः शिरोलङ्कारः यस्य—Drawing the picture of her beloved शंकर with her own hand. "आदरातिशयात् स्वहस्तेनैव चित्रे निवेशितः" नारायण. *Cf.* "वियोगावस्थासु प्रियजनसदृक्षानुभवनं ततश्चित्रं कर्म स्वपनसमये दर्शनमपि । तदङ्गस्पृष्टानामुपगतवतां स्पर्शनमपि प्रतिकारः कामव्यथितमनसां कोऽपि कथितः" रहसि—in private "सखीमात्रसमक्षमित्यर्थः" मल्लीनाथ. Otherwise it would have been impossible for any one to know, what she used to do at night. This verse is indicative of the further stage of the same lovesickness—उन्मादावस्था. मुग्धया—an innocent one.

59. यदा च विचिन्वती इयं तस्य जगत्पतेः अधिगमे अन्यं विधिं अपश्यत् तदा गुरोः अनुज्ञया अस्माभिः सह तपसे तपोवनं प्रपन्ना ।

विचिन्वती—अन्वेषणं कुर्वती—seeking after. यदाहि *v. l.* for यदा च which is nearly the same. When पार्वती intently loved him and found that all means (such as beauty, etc.) could not secure him for her she took to penance as the last resource. "गुरोऽनुज्ञया इति विमृश्यकारित्वं द्योत्यते" अरुणगिरि.

60. सख्या स्वयं कृतजन्मसु तपःसाक्षिषु एषु द्रुमेषु अपि फलं दृष्टम्, अस्याः शशिमौलिसंश्रयः मनोरथः प्ररोहाभिमुखः अपि न च दृश्यते ।

तपः साक्षिषु—तपस्समकालीनत्वात् तपसः साक्षिभूतेषु who were the witnesses to her penance from the very beginning.

कृतं जन्म येषां तेषु—Who were given birth–planted.

प्ररोहाभिमुखः—sprouting (goes with मनोरथः) "प्ररोहशब्दो लोके वृक्षाद्यङ्कुरोत्पत्तौ प्रसिद्धः" नारायण. शशिमौलिः शंकरः संश्रयः आश्रयो यस्य (तादृशो मनोरथः). The desire that has for its resort the god शंकर. The trees that she herself planted were now blossoming, but as yet, least signs for the fulfilment of her own desire were not manifest. The poet wants to impress that पार्वती practised penance for a long time and even then her success was in suspense. Her fruitless penance is more keenly brought to the reader's mind when observed as contrasted with the condition of the trees, in the penace-grove which she herself had planted.

61. Prose order:—प्रार्थितदुर्लभः स तपःकृशां सखीभिः अस्रोत्तरम् ईक्षिताम् इमाम् सखीम् तदवग्रहक्षतां सीतां वृषा इव कदा अभ्युपपत्स्यते न वेद्मि. ।

प्रार्थितदुर्लभः—This is उद्धृत from "भविष्यति प्रार्थितदुर्लभः कथम् "above." ।

अस्रोत्तरम्—अश्रुप्रधानं यथा तथा. । That emaciated condition of Parvati could not but make her friends shade tears.

तदवग्रहक्षताम्—This can be explained in two ways, (i) तस्य (इन्द्रस्य)अवग्रहेणं क्षताम् । and (2) तद् to be taken separately as the object of वेद्मि. . The latter makes the sentence complete; but it, in a way, may be said to detract from the comparison of Indra's and Siva's obtsinacy. अवग्रह=drought; it can also mean "disfavour" opposed to अनुग्रह and thus can be interpreted with Parvati too.

सीताम्—As the quotation from Amara shows, (सीता लाङ्गलपद्धतिः ।). The word means a "furrow in the glebe."

Secondarily, it came to mean "ploughed land." This, of course, is in greater need of the rain.

वृषा—This is one of the many epithets of Indra (वासवो वृत्रहा वृषा।). It is derived as वर्षति इति।. Indra is originally the lord of rain. *cf.* "वीरः स्वे यो व्यतनुत पदे वृष्टिहीने किलङ्गां मोघां मेघोदरभिदुरया बाणवृष्ट्या मघोनः" quoted by नारायण.

62. Prose Order:—इङ्गितज्ञया तया इति अगूढसद्भावं निवेदितः नैष्ठिकसुन्दरः अव्यञ्जितहर्षलक्षणः अयि इदम् एवम् परिहासः इति इमाम् अपृच्छत्।

इङ्गितज्ञा—इङ्गितं अभिप्रायं जानाति इति one who knew the desire of (Pārvati's) heart. (*Cf.* "अथो वयस्यां परिपार्श्ववर्तिनीं विवर्तितानञ्जननेत्रमैक्षत." । 51 above). The meaning of the word as taken by Mallinatha is good, though some would take it to mean "अभिप्रायानुरूपचेष्टा" where mistakably enough, by the word चेष्टा, they include both आकार and इङ्गित in the same sense *i e.* इङ्गित the *cheshtâ* itself was indicative of the desire in her heart.

अगूढसद्भावम्—न गूढः सद्भावः यस्मिन्।

M. takes सद्भाव=सदभिप्राय—honest intentions. One would, however, like to understand by it "the real state of things"—(Chāritra. सद्भाव=परमार्थः।) She did not pervert the truth.

नैष्ठिकसुन्दरः—नैष्टिकश्चासौ सुन्दरश्च।

नैष्ठिक is explained as निष्ठा मरणमवधिर्यस्य। a life-long *brahmachârî* who lives at his *guru's* house. Two kinds of *brahmachâris* there are नैष्ठिक and उपकुर्वाण; the latter being allowed to enter upon the life of a *grihastha*. नारायण remarks "उपकुर्वाणो नैष्ठिकश्चेति द्विविधो ब्रह्मचारी। तत्र गृहस्थाद्याश्रमेषु य उपकरोति स उपकुर्वाणः। यस्तु ब्रह्मचार्याश्रममात्रेण निष्ठां प्राप्नोति स नैष्ठिकः।" नैष्ठिको ब्रह्मचारी तु वसेदाचार्यसन्निधौ। तदभावेऽस्य तनये पत्न्यां वैश्वानरेऽपिवा॥ याज्ञ० I—49.

सुन्दर can be interpreted as विलासी or the best (among ascetics). M. takes the former way, and explains the incompatibility between नैष्ठिक and सुन्दर by referring to the

extraordinary nature of the Lord. This word, together with the phrase अव्यञ्जितहर्षलक्षण: is suggestive of Śiva's love for Párvati. The ascetic truly Śaṅkara in disguise, did not manifest his delight at this confession.

63. Prose Order—अथ मुकुलीकृताङ्गलौ अग्रहस्ते स्फटिकाक्षमालिकां समर्पयन्ती अद्रेः तनया कथंचित् चिरव्यवस्थापितवाक् मिताक्षरम् अभाषत ।

मुकुलीकृता: (Shaped like a bud) अङ्गुलयः यस्मिन् ।

अग्रहस्त—This is one of those very famous of Sanskrit compounds. It is dissolved in the following ways: (i) हस्तस्य अग्रम् ।—and the पूर्वनिपातित्व of अग्र is said to be according to वाहिताग्न्यादिषु । etc. which is not correct; (ii) अग्रश्चासौ हस्तश्च ।—A *Karmadhâraya*. But the objection to this is that the qualities of अग्रत्व and हस्तत्व are not identical as the नीलत्व and उत्पल are in नीलोत्पलम्. To this Vāmana replies: "हस्तग्राग्रहस्तयोर्गुणगुणिनोर्भेदाभेदात् ।". The identity is considered to be metaphorical. Rāghava's remarks on "आवेणवक्खलिदाए गईए षब्भट्टे मे अग्गहत्थादो पुष्फभाअणम्" in Sāk. IV. may be read.

कथंचित् can also be taken with अभाषत, with a better sense.

चिरव्यवस्थापितवाक्—चिरं व्यवस्थापिता वाक् यया । Who adjusted her speech for a long time. Such was the delicacy of the subject, that she had to give to it long deliberation before proceeding. The epithet अद्रेः तनया brings out the contrast. The daughter of the mountain is expected to inherit the quality of स्थैर्य, but even she was ruffled.

मितानि अक्षराणि यथा तथा मिताक्षरम्—Few words only. "मितभाषित्वं तूत्तमनायिकाधर्मः" *Cf.* "प्रविरला इव मुग्धवधूकथाः सुरभिगन्धिषु शुश्रुविरे गिरः कुसुमितासु मिता वनराजिषु" रघु IX. 34.

64. Prose order—वेदविदां वर, त्वया यथा श्रुतं अयं जनः उच्चैः पदलङ्घनोत्सुकः । इदं तपः तदवाप्तिसाधनं किल । मनोरथानाम् अगतिः न विद्यते ।

उच्चैः पदस्य लङ्घने (आक्रमणं) उत्सुकः । It may be noted that Mallinātha explains यथा as सम्यक्, he does not supply one तथा as some do.

किल—Mallinātha understands by this अलीके and says: अतितुच्छत्वादसाधकम्। By this Pārvati means that the goal is beyond her reach ; she is exalting the goal—She had already a glimpse of the impossibility of the achievement of her desires. But desires transcend all limits. किल can also be taken to mean "indeed" "नहि लोके मनोरथानामविषयः कश्चिदप्यर्थो विद्यते इत्यर्थः" नारायण.

65. अथ वर्णी आह। महेश्वरः विदितः। पुनरेव त्वं तदर्थिनी एव वर्तसे। अमङ्गलाभ्यासरतिं तं विचिन्त्य तव अनुवृत्तिं कर्तुं न च उत्सहे।

वर्णी—See 52. above.

आह—Vâmana's caution: आहेति भूतार्थे लट्प्रयोगो भ्रान्तिमूलः।

विदितः—We may take this to mean: "Known to all"—in a rather ironical way.

Mallinâth's taking पुनः with वर्तसे and referring to the past disappointment is not so good. The *Varṇî* wants to emphasize the ridiculousness of the desire. None but Pârvati desires to have such a husband ! The proper order would be in that case, त्वमेव पुनस्तदर्थिनी वर्तसे।.

अमङ्गलानाम् अभ्यासे रतिः यस्य।—These अमङ्गलs are ennumerated in the following from Parvatipariṇaya. आक्षेपो भसितं विभूषितमहिर्वासः पितॄणां वने। वेतालाः परिचारकाः प्रतिदिनं वृत्तिश्च भिक्षामयी। इत्थं यस्य शुभेतराणि चरितान्याख्यान्ति सर्वे जनाः तास्मिन्मौग्ध्यवशान्मातस्तव रुचिं बन्धाति किं ब्रूमहे। "as also" जगत्रयी लोचनबालचान्द्रका कुलस्य रत्नं भवती क्व भूभृतः। कृत्तिवासाः पितृकानने वसन्नमङ्गलाचाररतिस्त्रिलोचनः॥ पार्व० IV. 12. 13.

66. Prose Order—अवस्तुनिर्बन्धपरे आमुक्तविवाहकौतुकः अयं ते करः वलयीकृताहिना शंभोः करेण तत्प्रथमावलम्बनं कथं नु सहिष्यते।.

अवस्तुनि निर्बन्धः परं यस्याः।. अवस्तु is an improper thing. The अ here has the sense of अप्राशस्त्य, out of those six—तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता। अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः।.

विवाहकौतुकम्—विवाहहस्तसूत्रम्, The name of the thread-ring worn by the bridegroom round the wrist before the beginning

of the marriage ceremony. *Cf.* अथ वधूवरौ स्वशेखरपुष्पक्षीरघृतेनाप्लाव्य परस्परातिलकं कुरुतः कण्ठे स्रजमामुञ्चतः कौतुकसूत्रं च करे बधीयताम्। आश्वलायनगृह्यपरिशिष्ट. "कौतुकं मङ्गले हर्षे हस्तसूत्रे कुतूहले" इति शाश्वतः. We have nothing to do with the time during which it is worn; for these particulars, see Pandits' note on Raghu. VIII-1. अथ तस्य विवाहकौतुकं ललितं बिभ्रत एव पार्थिवः । etc.

वलयीकृताः अहयः यस्मिन्- । *Cf.* अस्मिन्नगृह्यत पिनाकभृता सलीलमाबद्धवेपथुरधीरविलोचनायाः । विन्यस्तमङ्गलमहौषधिरीश्वरायाः स्रस्तोरगप्रतिसरेण करेण पाणिः ॥ Kirāta V-33.

The sense of प्रथम is brought out in Mallinātha's अग्रतो यद्भावि तद्दूरेऽवतिष्ठतां प्रथमं करग्रह एव दुःसहः ।

67. Prose order त्वम् एव तावत् स्वयं परिचिन्तय यदि कलहंसलक्षणं वधुदुकूलं शोणितबिन्दुवर्षि गजाजिनं च एते कदाचित् योगम् अर्हतः ।

The sense of तावत् as explained by Mallinātha is मानार्थे (यावन्मात्र विचारणीयं तावन्मात्रम् ।) It can also be taken to mean प्रथमम्.

कलंहसलक्षणम्—कलहंसो लक्षणं यस्य । This is taken to mean with the figures of swans painted upon it with गोरोचना etc. So in it appears that the word may mean, "of which the swan is the sign"—which is as white as a "swan"—The contrast between the whiteness and the hideous symbol of redness in शोणितबिन्दु is heightened. "गोरोचनादिलिखितहंसमिथुनसनाथपर्यन्तभागमित्यर्थ" नारायण ।

शोणितबिन्दुवर्षि—etc. It is well known that Śiva killed Gajâsura, through his power of मन्मथजित्व and the boon he conferred upon him was to wear his skin. (see काशीखण्ड. अध्याय 38). For another variation of the story see स्कन्दपुराण, गणेशखण्ड, अध्याय १०.) Kálidása often refers to this—The inference which is drawn from शोणितबिन्दुवर्षि that the old skin was exchanged for a fresh one is perhaps ridiculous. Śiva's fondness for the skin dripping with gore is stated in "हर पशुपतेरार्द्रनागाजिनेच्छाम्" in Meghadûta. I. 36 "एकैश्वर्ये स्थितोऽपि प्रणतबहुफले यः स्वयं कृत्तिवासाः" मालवि० I. 1. The knot is tied

between the garments of the bride and the bridegroon at the time of the marriage, and this would be a splendid union too!

68. Prose Order चतुष्क पुष्पप्रकरावकीर्णयोः पादयोः तव अलक्तकाङ्कानि पदानि विकीर्णकेशासु परेतभूमिषु परः अपि कः नाम अनुमन्यते।

चतुष्के यः पुष्पाणां प्रकरः तस्मिन् अवकीर्णयोः। चतुष्क is derived as: चत्वारो ऽवयवाः यस्य.। 'चतुष्कं सचतुस्तम्भं विवाहे स्थानमण्डपम् इति भोजः It is a hall resting on four pillars ("सचतुस्तम्भम्") It was customary to litter the ground with flowers; and Parvati's delicate feetjust moving upon these would indeed ill suit the cemetry ground with the digusting litter of corpse hair.।

पदानि is taken to mean by it as पादन्यासचिह्नानि। It can simply stand for पादन्यास s too

परेत is the departed—hence dead.

69. Prose Order--त्रिनेत्रवक्षः तव सुलभम् अपि। अतः परम् अयुक्तरूपम् किं वद। यत् हरिचन्दनास्पदे स्तनद्वये चिताभस्मरजः पदं करिष्यति।

Mallinātha's construction appears to be better. We can take the whole as one compared as C. does. But then अपि loses its force. Here अपि has the sense of "granted that." The raillery gains in effect.

People besmeared their body with हरिचन्दन—the sandal of हरि—Indra.

Cf...........पुंसि वा हरिचन्दनम्। Amara. also धृष्टं च तुलसीकाष्ठं कर्पूरागुरुयोगतः। अथवा केशरैर्योज्यं हरिचन्दनमुच्यते। Padmapuraṇa. *Cf.* also आमृष्टवक्षोहरिचन्दनाङ्का etc. Śak. VII. and "कृप्ताङ्गरागो हरिचन्दनेन" रघु VI-60.

Instead of this हरिचन्दन, there will be the ashes of the burnt bodies which is शिव's अङ्गराग।

70. Prose Order—इयं च ते पुरतः अन्या विडम्बना। यत् ऊढया वाराणराजहार्यया त्वया अधिष्ठितं वृद्धोक्षं विलोक्य महाजनः स्मेरमुखः भविष्यति।-

पुरतः—आदौ एव।—In the first place, to follow immediately. The *brahmacharin* seems to suddenly remember this item, and

hence the use of पुरत: "पतिगृहप्रस्थानवेलायामित्यर्थः । अनेन पूर्वमेव वक्तव्यमिदं मया विस्मृतमिति व्यज्यते" नारायण and "भर्तृगृहगमनारम्भ एव" अरुण०

ऊढया—परिणीतया—(by) you who are married.

वारणराजेन हार्यया—*V. l.* वारणराजभार्यया as दक्षिणावर्त takes it. this reading appears to be better. Habituated to or worthy of being carried by an elephant.

वृद्धश्चासौ उक्षा च ।. उक्षन् is changed to उक्ष at the end of a Karmadharaya by Pāṇ. V. 4—77.

स्मेर—this is formed according to नमिकम्पिस्म्यजसकमहिंसदीपो र: Pāṇ. III. 2—267.

This being carried upon the back of an elephant is to be witnessed in the present-day बरात in the marriages of princes. Even the great and respected—despite their natural goodness of heart could not suppress the smile when they see Pārvāti mounted upon the back of Sîva's bull!

71. Prose Order—पिनाकिन: समागमप्रार्थनया संप्रति द्वयं शोचनीयतां गतम् सा कलावत: कान्तिमती कला च अस्य लोकस्य नेत्रकौमुदी त्वंच ।०

कलावत:—of the moon.

नेत्रकौमुदी—This is of frequent occurence;—beautiful woman compared to the delightful moonlight. *Cf.* शशिनमुपगतेयं कौमुदी । *etc.* Ragh. VI. 85; त्वं कौमुदी नयनयो: । etc. Uttara. III. विलोचनचन्द्रिका—Malati. 1. 36. and "या कौमुदी नयनयो र्भवत: सुजन्मा" मालती माधव I. 34. This verse (it seems), it was unfortunate of Kālidása to write. The rhrtoricians have severly criticised it.

(1) for the word पिनाकिन:—which is the indication of valour and this is inappropiate here. The suggested emendation is कपालिन: which is no doubt good as it emphasizes the शोचनीयत्व. But it must be borne in mind that पिनाकिन: is the original, genuine reading. We have to consider what Kālidāsa wrote, and not what people in Kālidāsa's place would write:

(2) कलाचसा The use of च and the fault of अक्रमता. The च ought to have been immediately after त्वम्. ।

It is also quoted in Kávyaprakāsa to illustrate the absence of the relative pronoun. See Mall. "अत्र द्वयं गतमित्यादौ पिनाक्यादिपदवैलक्ष्येण किमिति कपाल्यादिपदानां काव्यानुगुणत्वं" काव्य० प्र० V. and प्रदीप's remark thereon.

72. Prose Order—वपुः विरूपाक्षम् । अलक्ष्यजन्मता । दिगम्बरत्वेन वसु निवेदितम् । बालमृगाक्षि, यत् वरेषु मृगते तत् त्रिलोचने व्यस्तम् अपि अस्ति किम् ।

(Read: कन्या वरयेत रूपं माता वित्तं पिता श्रुतम् । बान्धवाः कुलमिच्छन्ति मिष्टान्नमितरे जनः ॥) also कुलेन कान्त्या वयसा नवेन गुणैश्चतैस्तैः........" रघु VI. 79.

विरूपाक्षम् । विरूपाणि (विकृतरूपाणि) अक्षिणी यस्य तद्विरूपाक्षम् । "वैरूप्यं च त्रिनेत्रत्वात् ।"—But C says: "विरूपं भीषणं (अग्निरूपमान् ।) । ". सर्वाङ्गप्रधानं चक्षुरेव यस्य विरूपं तस्येतराङ्गं किं वक्तव्यम् ।) Ex pede Hereculeum! अलक्ष्यम् जन्म तस्य भावः ।—This involves the fault of अविमृष्टविधेयांशत्व. The word अलक्ष्य is to be emphasized with जन्म etc· Mamata suggets अलक्षिताजनिः to avoid this fault.

"दिशोऽपि वसनम्"—shows Siva's poverty.

बालमृगाक्षि This might have been intended as direct contract to विरूपाक्ष.

व्यस्त—Separately, as opposed to समस्त. All these three qualifications of possessing handsome form, noble birth, and riches—not only are these not found together in Siva, but *not one* of them is to be found.

73. Prose Order—अस्मात् असदीप्सितात् मनः निवर्तय । तद्विधः क पुण्यलक्षणा त्वं च क । साधुजनेन श्मशानशूलस्य वैदिकी यूपसत्क्रिया न अपेक्ष्यते ।

असदीप्सित—An unbecoming (bad) desire. The use of क.........क is familiar enough. पुण्यलक्षणा may refer generally

to Pârvâti's holy nature or particularly to those auspicious signs possessed by her.

वैदिकी—"वेदोक्ता"—वेदे भवा—formed according to अध्यात्मादिभ्यः। etc.

यूप—पशुबन्धनसाधनभूतः संस्कृतदारुविशेषः। is the post, consecrated with Mantras to which the beast is tied.

Both the यूप and the श्मशानशूल have similar functions; yet no sane man expects the honour and respect paid to the यूप, to be paid also to the शूल. सत्क्रिया may refer to the respect, in general; or to the particular consecration by Mantras etc, as M. (प्रोक्षणाभ्युक्षणादिसंस्कारः।) the word श्मशानशूल is particularly used; it is a covert-hint and is applicable to शिव too! who is a स्थाणु in श्मशान।. तत्परित्यज्य गिरिशमुपेन्द्रं वा शचीपतिम्। वरय त्वं विशालाक्षि वरयोग्यौ तुतौ तव " शिव पुराणम्।.

74. Prose Order—इति प्रतिकूलवादिनि द्विजातौ प्रवेपमानाधरलक्ष्यकोपया तया उपान्तलोहिते विलोचने विकुञ्चितभ्रूलतं तिर्यक् आहिते।.

प्रतिकूल—प्रतीपं कूलात् Against the current and hence "opposite." प्रवेपमानेन अधरेण लक्ष्यः कोपः यस्याः।—Her neither lip was throbbing through anger. उपान्ते लोहिते—That were reddesh at the corners. विकुञ्चिताः भ्रूलताः यस्मिन्—In which action, the eyebrows were knitted. All these are signs of anger that was simmering in her.

75. Prose Order—एवम् उवाच च। नूनं त्वं परमार्थतः हरं न वेत्सि यतः माम् एवम् आत्थ। मन्दाः महात्मनाम् अलोकसामान्यं अचिन्त्यहेतुकं चरितं द्विषन्ति।.

परमार्थतः—In reality. *Cf.* परमार्थेन न तु गृह्यतां वचः। Śak. II.

मन्दाः—मूढाल्पापटुनिर्भाग्या मन्दाः। Amara. न लोकसामान्यम्—Uncommon-not common to the ordinary world.

अचिन्त्यः हेतुः अस्य—Whose cause passes comprehension.

This is the direct answer to विदितो महेश्वरः above. *Cf.* दह्यमानाः सुतीव्रेण नीचाः परयशोग्निना। अशक्तास्तत्पदं गंतु ततो निन्दां प्रकुर्वते।.

76. विपत्प्रतीकारपरेण भूतिसमुत्सुकेन वा मङ्गलं निषेव्यते, जगच्छरण्यस्य निराशिषः सतः आशोपहतात्मवृत्तिभिः एभिः मङ्गलैः किम्।

विपदः प्रतीकारः स परं यस्य—who is intent on warding off difficulties.

भूत्यां समुत्सुकेन—who is very eager to gain prosperity (भूति) "इष्टार्जनानिष्टपरिहारार्थं मङ्गलाचरणमित्यर्थः येषुतैः" अरुणगिरि.

आशया उपहताः आत्मवृत्तयः—which cloud the judgement of the mind and hold it forth with ambitious desires; or आशया उपहतः आत्मा (self) येषां ते आशोपहतात्मानः तेषां वृत्तिभिः (doings.) —by this course of actions of those whose minds are befooled by desires. *Cf.* "न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किंचन । नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि" Bg. III-22. and. "अनवाप्तमवाप्तव्यं न ते किंचन विद्यते। लोकानुग्रह एवैको हेतुस्ते जन्मकर्मणोः" रघु० X-31. Though पार्वती argues correctly, yet as a deity it was the duty of शंकर to bind himself with the routine of the world, and be its leading factor.

77. स आकिंचनः सन् संपदां प्रभवः पितृसद्मगोचरः (सन्) त्रिलोकनाथः भीमरूपः स शिवः इति उदीर्यते पिनाकिनः याथार्थविदः न सन्ति।

अकिंचन किमपि नास्ति यस्य—possessed of no wealth.

त्रिलोकनाथः–त्र्यवयवो लोकः त्रिलोकः तस्य नाथः–The lord of the three worlds.

पितॄणां सद्म पितृसद्म श्मशानं स एव गोचरो विषयो यस्य—who lives in the creamation ground. Nobody can really fathom the greatness of शंकर *Cf.* "याथार्थ्यं वेद कस्तव" रघु० X 24.

78. विश्वमूर्तेः वपुः विभूषणोद्भासि पिनद्धभोगि वा, गजाजिनालम्बि दुकूलधारि वा कपालि वा इन्दुशेखरं स्यात् न अवधार्यते.

पिनद्धः भोगी यत्र—possessed of serpents

विश्वमेव मूर्तिर्यस्य—whose self is the whole universe. कपाली—who wears the skull. According to काशीखण्ड once शंकर got angry with ब्रह्मदेव and created in his wrath the terribl

कालभैरव who is said to have cut off one of the heads of ब्रह्म the skull of which he (as कालभैरव) is said to wear. *Cf.* "जगत्सिसृक्षा समयेषु वेधसां प्रणामलोलानि शिरांसि पादयोः। जगद्विरामेषु कपालशेषतां गतानि तिष्ठन्तु जटासु धूर्जटेः"। *Cf.* also तां 'तां अवस्थां प्रतिपद्यमानं स्थितं दशव्याप्यदिशो महिम्ना।" विष्णोरिवाक्यानवधारणीयमीदृक्तया रूपमियत्तया वा Ragh. XIII. 5. This is a reply to verses 66, 67, 71 and such-like.

79. तदङ्गसंसर्गम् अवाप्य चिताभस्मरजः ध्रुवं विशुद्धये कल्पते तथाहि नृत्याभिनयाक्रियाच्युतं तत् अम्बरौकसां मौलिभिः विलिप्यते । तस्य अङ्गस्य संसर्गम्—coming in contact with his body. नृत्या° the dance of शंकर is called ताण्डव. अभिनयs are the gesticulations indicative of feelings. For विलिप्यते some read विलुप्यते which goes with भस्म and means "is taken away." चिताभस्म see V—69. अम्बरौकसां स्वर्गिणाम् of those who reside in heavens.

80. प्रभिन्नदिग्वारणवाहनः वृषा असंपन्नः वृषेण गच्छतः तस्य पादौ मौलिना उपगम्य विनिद्रमंदाररजोऽरुणाङ्गुली करोति। प्रभिन्नः दिग्वारणः दिग्गजः वाहनं यस्य—who has for his vehicle the intoxicated quarter elephant "प्रभिन्नोगर्जितो मत्तः" इति सिंहः। विनिद्रमन्दा.°—विनिद्राणां उत्फुल्लानां मन्दाराणां मन्दारपुष्पाणां रजोभि अरुणाः अङ्गुलयः ययोः तां—makes them possessed of toes reddish with the pollen of full-blown मन्दार flowers. What matters if he goes on a bull or is possessed of nothing when even इन्द्र the Lord of gods bends himself low before him with all his affluent magnificance. *Cf.* नारायण's quotation "महोक्षः खट्वाङ्गं परशुरजिनं भस्मफणिनः कपालंचेतीयत् तव वरदतन्त्रोपकरणम्। सुरस्तां तां सिद्धिं दधाति तु भवद्भ्रूप्रणिहितां नहि स्वात्मारामं विषयमृगतृष्णाभ्रमयति।"

81. दोषं विपक्षता अपि च्युतात्मना त्वया ईशं प्रति एकं साधु भाषितं यमात्मभुवः अपि कारणमामनन्ति स कथं लक्ष्यप्रभवः भविष्यति। विवक्षता (त्वया) *v. l.* विवृण्वता both mean nearly the same thing namely "explaining, pointing out" च्युतात्मना—च्युतः आत्मा येन—who forgot himself. लक्ष्यप्रभवः लक्ष्यः प्रभवः यस्य—whose origin can be traced (for he is said to have created the creator him-self

ब्रह्मदेव). आमनन्ति—वदन्ति (श्रुतयः) "म्ना अभ्यासे इति धातुः" This verse is taken as an example of अर्थापत्ति as well as of शब्दप्रमाणालङ्कार also.

82. विवादेन अलं त्वया श्रुतः सः अशेषं तथाविधः तावत् अस्तु मम भावैकरसं मनः अत्र स्थितम्, न कामवृत्तिः वचनीयमीक्षते। अलं is used in the sense of वारणे. See मल्लि.'s remark on अलं महीपाल तव श्रमेण" रघु॰ II. 34. *cf.* "अलं गर्वेण ते चन्द्र त्वत्तुल्या सन्तिहि स्त्रियः" कुवलयानंदः भावैकरसं—attached by the only feeling of love (that has nothing to do with any other things as "reason" *etc.*) *Cf.* "अहमेकरसस्तथापि ते" Raghu. VIII. 65. *v. l.* स्थिरं for स्थितम् firmly set on. नकामवृत्तिः......*cf.* "नासौ न काम्यो नच वेद सम्यक् द्रष्टुं न साभिन्नरुचिर्हि लोकः" This case of taste is the same as that of "love" which requires no explanation *cf.* "रागाज्जनमिदमक्ष्णोर्व्यञ्जयाति प्रायशोगुणान्विषये। दोषाञ्जनं तु दोषानुभयसक्तिर्व्यनक्ति भूतार्थम् ॥"

83. हे आलि स्फुरितोत्तराधरः पुनः किमपि विवक्षुः अयं बटुः निवार्यताम्, न केवलं यः महतः अपभाषते (अपि तु) यः तस्मात् श्रुणोति सोऽपि पापभाक् ।

स्फुरितं तदुत्तरं अधरः यस्य सः—Whose lower lip is throbbing (suggestive of further speech). **निवार्यताम्**—take him off. *cf.* "पुनरपि वक्तुकाम इव आर्यः" शाकु॰ I. न केवलं......पापभाक्—A person should not even hear the abuse of a great man and still less should oneself do it. "गुरोर्यत्र परीवादो निन्दा वापि प्रयुज्यते। कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः" quoted by नारायण from मनु II. **आलि**—is female friend "आलिः सखी वयस्या चेत्यमरः" *cf.* "निवार्यतामयं भिक्षुर्विवक्षुः स्फुरिताधरः। न तावन्निन्दकः पापी यथा शृण्वन्शाशिप्रभे" वामन. पु॰ यं करोति महादेवनिन्दामात्मविनाशिनीम्। सपापिष्टतरस्तस्माद्यः शृणोति स पापभाक्" शिवपुराण.

84. अथवा इतः गमिष्यामि इति वादिनी सा स्तनभिन्नवल्कला चचाल च स्वरूपम् आस्थाय कृतस्मितः वृषराजकेतनः तां समाललम्बे च ।

स्तनाभ्यां भिन्नं वल्कलं यस्याः सा—with the bark garment set aside (owing to the haste of her actions) वृषाणां राजा केतनं यस्य सः—whose harbinger is the greatest amongst bulls. *Cf.*

इत्युक्त्वोत्थाय गच्छन्त्यां पिधाय श्रवणावुभौ । स्वरूपं समुपाश्रित्य जगृहे वसनं हर: " ब्रह्म० पु०. When she thought that she or her friend could not stop the बटु from speaking, she set off having chosen the remaining alternative, as given by स्मृतिs under such circumstances. " गन्तव्यं वा ततोऽन्यत: " when शिव assumed his natural form and held her up.

85. तं वीक्ष्यवेपथुमतीसरसाङ्गयष्टि: निक्षेपणाय उद्धृतं पदं उद्वहन्ती शैलाधिराजतनया मार्गाचलव्यतिकराकुलिता सिन्धुः इव न ययो न (चापि) तस्थौ ।.

वेपथु:—tremor. This is one of the सात्त्विकभावs " स्तम्भ: स्वेदोऽथ रोमाञ्च स्वरभङ्गोऽथ वेपथु: । वैवर्ण्यमश्रुप्रलयौ इत्यष्टौ सात्त्विका: गुणा: ॥" शैलानां अधिराज: तस्य तनया—the daughter of the lord of mountains. सरसा रसेन सहिता (स्वेदार्द्रा) अङ्गयष्टि: प्रशस्तमङ्गं यस्या: सा—whose body was perspiring due to excitement. मार्गे य: अचल: तस्य व्यतिकर: (contact) तेन आकुलिता—who is confounded so as not to know her own course (of action); bewildered. This is very beautifully described and the simile is more beautiful and appropriate. Any expression to explain the action "न ययौ न तस्थौ" is bound to sound hollow and the significance shall have to be felt only. This is quoted in दशरूपक as an instance of साध्वस; *cf.* " पार्वती सविस्मयप्रहर्षं पुलकिततनुः प्रस्विन्नगण्डा प्रतिपत्तिमूढातिष्ठति ॥ " पार्व० परिणय ।

86. हे अवनताङ्गि अद्यप्रभृति अहं तव तपोभिः क्रीत : दास: इति चन्द्रमौलौ वादिनि सा नियमजं क्लमं अहाय उत्ससर्ज क्लेश: हि फलेन पुन: नवतां विधत्ते ।

अनवताङ्गि *v. l.* अनवमाङ्गि अनवमम् (उत्कृष्ट) अङ्गं यस्या: सा—

विधत्ते means "प्रत्यग्रतामाच्छादयति" नारायण. fatigue is nowhere—a matter of old, as if—where the labour is paid with a reward. The poet deduces a general proposition from a particular observation (in the case of पार्वती) the truth of which is to be realized in every moment of our life. He means to say that "success is the fruit of the tree of labour, which naturally, contains the seed that bred it, and which (the seed) again in its turn brings foth the tree. We are bound to forget the tree when its fruit captures our mind 'फलेन सहकारस्य पुष्पोद्गम इव प्रजाः' रघु. IV." पार्वती got the desired object and her fatigue was nowhere, for,

॥ क्लेशः फलेन हि पुनर्नवतां विधत्ते ॥